International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(4): 86-88
© 2019 IJSR
www.anantaajournal.com
Received: 22-05-2019
Accepted: 23-06-2019

**Dr. Hariprasad K**
Asst. Professor, Department of Education, Rastriya Sanskrit Sansthan (D.U.) Rajiv Gandhi Campus, Sringeri, Karnataka, India

**Correspondence**
**Dr. Hariprasad K**
Asst. Professor, Department of Education, Rastriya Sanskrit Sansthan (D.U.) Rajiv Gandhi Campus, Sringeri, Karnataka, India

# अवधानकेन्द्रीकरणम्

**Dr. Hariprasad K**

**सारांश**
स्वपरिवेशे विद्यमानस्य विशिष्टतत्त्वस्य विषये सूक्ष्मरूपेण जागरूकतायाः प्राप्तिः अवधानं भवति । किन्तु अनिच्छतोऽपि पुरुषस्य मानसिकघटनासु बाह्यघटनासु च आकर्षणेन तस्य अवधानं केन्द्रीकृतं भवति । प्रत्यक्षीकरणार्थम् (Perception) अवधानम् अनिवार्यं भवति । आहत्य इदमित्थं वक्तुं शक्यते यत् यदा किमपि उद्दीपकं वस्तु अथवा घटना अवधानस्य केन्द्रस्थाने यदा समायाति तदा एव पुरुषस्य प्रत्यक्षीकरणं जायते । इत्युक्ते तद्वस्तुविषयकज्ञानं पुरुषः प्राप्नोति ।
अस्माकं चक्षुषोः पुरतः बहूनि वस्तूनि भवन्ति चेदपि कस्मिंश्चिदेव वस्तुनि अस्माकमवधानं केन्द्रीकृतं भवति । तत्रापि छात्रसमूहे यदि एकस्य छात्रस्य उपरि अवधानं गतं चेत् पूर्णरूपेण तस्य छात्रस्य शरीरं पश्यामः इति तु न। तस्य किमप्यङ्गं, ध्वनिं, क्रियां वा साक्षात्कुर्मः । ईदृशस्य अवधानस्य किं कारणं स्यादिति विचार्य, अवधानकेन्द्रीकरणस्य उपायाः लेखेऽस्मिन् आबद्धाः ।

**कुटशब्द:** अवधानम्, मनोवृत्तिः, मूलप्रवृत्तिः, छात्ररुचिः

## प्रस्तावना

पाश्चात्यवैज्ञानिकप्रपञ्चे अवधानम् इत्यस्य लक्षणं (परिभाषा) एकरूपेण न प्राप्यते । प्राचीनपाश्चात्यसाहित्ये चैतन्ययुक्तं ज्ञानम् (Conscious Awareness) अवधानम् इति परिभाषितम् । संरचनावादिमनोविज्ञाने चेतनावस्थायां वस्तूनां (तत्त्वज्ञानम्) स्पष्टता (Clearness of Items in Consciousness) एव अवधानम् इति परिभाषितम् । वुण्ट् वर्यस्य (Wudnt) अभिप्रायानुगुणं अवधानं काचित् प्रक्रिया वर्तते यन्माध्यमेन उद्दीपकं तत्वं चेतनायाः (बुद्धेः/चैतन्यस्य) सीमापप्रदेशात् (Peripheral Consciousness) चेतनायाः केन्द्रदेशं (Core or focus of consciousness) आगच्छति । बोरिङ्ग् (Boring 1929) इत्यस्य अभिप्रायानुगुणं प्रत्यक्षीकरणं अवधानमाध्यमेन स्पष्टप्रत्यक्षीकरणत्वं (Apperception) प्राप्नोति । क्रियात्मकमनोविज्ञानस्य (Functional Psychology) प्रतिपादकस्य विलियम् जेम्स् (१८९०) इत्यस्य कथनमस्ति यत्. "अवधानम् एका प्रक्रिया वर्तते या चेतनायाः बहिर्विद्यमानानां उद्दीपकानां चयनं करोति । एतेषु चितेषु उद्दीपकेषु कानिचन चेतनायां तिष्ठन्ति, कानिचन चेतनायाः बहिः तिष्ठन्ति" इति । अतः ईदृशस्य अवधानस्य विषये स्पष्टज्ञानार्थं सम्प्रति प्रयतेमहि येन अवधानकेन्द्रीकरणस्य उपायान् आविष्कृत्य शिक्षायां तान् उपयोक्तुम् अर्हामः ।

## उद्देश्यानि

अवधानस्य स्वरूपज्ञानप्राप्तिः
अवधानकेन्द्रीकरणस्य कारणानाम् अभिज्ञानम्
अवधानकेन्द्रीकरणस्य उपायानाम् अन्वेषणम

## शोधपद्धतिः

अस्मिन् शोधे शोधस्य उद्देश्यानि साधयितुं सर्वादौ शिक्षाशास्त्रे शिक्षामनोविज्ञानग्रन्थानां सर्वेक्षणं व्यधायि । अवधानस्य बाह्याभ्यन्तरकारणानि कक्ष्याशिक्षणे कथं सम्भवन्ति इति अध्यापनवेलायामेव अवहितम् । तदनुसारं ग्रन्थपरिशीलनं विधाय शोधपरिणामः व्यलेखि ।

## अवधानकेन्द्रीकरणस्य कारणानि

अस्माकं चक्षुषोः पुरतः बहूनि वस्तूनि भवन्ति चेदपि कस्मिंश्चिदेव वस्तुनि अस्माकमवधानं केन्द्रीकृतं भवति। तत्रापि छात्रसमूहे यदि एकस्य छात्रस्य उपरि अवधानं गतं चेत् पूर्णरूपेण तस्य छात्रस्य शरीरं पश्यामः इति तु न । तस्य किमप्यङ्गं, ध्वनिं, क्रियां वा साक्षात्कुर्मः ।

ईदृशस्य अवधानस्य किं कारणं स्यादिति साम्प्रतं विचार्यते । एतेषु अवधानकारणेषु प्राधान्येन द्वैविध्यं वर्तते बाह्यकारणानि, आभ्यन्तरकारणानि चेति ।

**बाह्यकारणानि**

१. गतिः, २. स्थितिः ३. तीव्रता, ४. विषमता, ५. नवीनता, ६. आकारः (स्वरूपम्), ७. प्रकृतिः, ८. रहस्यम् इत्यादीनि विविधानि बाह्यकारणानि अवधानस्य वर्तन्ते । क्रमशः तेषां विवरणं पश्यामः ।

**गतिः**

स्थिरवस्तूनामपेक्षया चलद्वस्तूनामुपरि अस्माकमधिकम् अवधानं भवति। यथा आकाशे रात्रौ नक्षत्राणां अवलोकनवेलायां उल्कापातस्य उपरि अस्मदवधानं यथा गच्छति तथा नक्षत्राणां उपरि न गच्छति ।

**स्थितिः**

प्रतिदिनम् अवलोकनसमये पूर्वदृष्टानि वस्तूनि स्थलानि वा पूर्वस्थितावेव भवन्ति चेत् अवधानं तत्र न गच्छति । तत्रैव वस्तुनः/वस्तूनां स्थितिः परिवर्तिता भवति चेत् अस्माकम् अवधानं तत्र गच्छति । यथा प्रतिदिनं गमनमार्गे विद्यमानं किमपि भवनं पतितं चेत् तत्र अस्माकं अवधानं गच्छति । नो चेत् न गच्छति।

**तीव्रता**

यद्वस्तु यावदधिकम् अस्मानाकर्षति तावदेव अवधानं तदुपरि गच्छति। अधिकप्रकाशयुक्तं वस्तु, अधिकध्वनिमुत्पादयद् वस्तु, अधिकगन्धयुक्तं वा वस्तु अस्माकमवधानम् आकर्षति । सुन्दरी वा कुरूपिणी वा भवतु, सौन्दर्ये कुरूपे वा तीव्रता अधिका भवति चेत् वयं तत् पश्यामः । इत्युक्ते जनानाम् अवधानं तत्र गच्छति ।

**विषमता**

सुन्दराणां परिवारे एकः कुरूपी भवति चेत् तद्विषये अवधानं गच्छति। सर्वेऽपि समरूपेण सुन्दराः भवन्ति चेत् तत्र अवधानकेन्द्रीकरणकारणमेव न भवतीति स्पष्टम् । तन्मध्ये विद्यमानः कुरूपी तु अवश्यम् अन्येभ्यः पार्थक्यं वैशिष्ट्यं च भजते इति कारणात् तद्दिशि अवधानं सहजतया गच्छति।

**नावीन्यम्**

यत्र यत्र नावीन्यं भवति तत्र तत्र अस्माकम् अवधानं केन्द्रीकृतं भवति । यथा गृहे आगतायाः नूतनवध्वाः विषये, नूतनदूरदर्शनविषये, नूतनयानविषये वा अवधानम् । पूर्वस्थितानां विषये उपेक्षा, अनवधानं वा स्वाभाविकं भवति । यथा पुरातनयानम्, पुरातनदूरवाणी, पुरातनयुतकम् इत्यादि ।

**आकारः**

वस्तूनामाकारः अस्माकम् अवधानस्य कारणं भवति । महदाकारकाणि वस्तूनि लघ्वाकारकवस्त्वपेक्षया अधिकं अस्मान् आकर्षति । अत एव जनानां अवधानं आक्रष्टुं महाविग्रहाः निर्मीयन्ते, महाफलकानि स्थाप्यन्ते, गणेशस्य महामूर्तयः प्रतिष्ठाप्यन्ते, महाभवनानि वा निर्मीयन्ते ।

**प्रकृतिः**

प्रकृतिरित्युक्ते स्वभाव इत्यर्थः । बालानाम् अवधानं क्रीडनकेषु भवति । यूनां विषमलिङ्गिषु भवति । वृद्धानां बालेषु भवति । इत्थं मनुष्यस्य प्रकृत्यनुसारं अवधानं तत्तद्विषये केन्द्रीकृतं भवति ।

**रहस्यम्**

कस्यापि विषयस्य रहस्यमवलम्ब्य विचारः क्रियते चेत् तदुपरि अवधानं निश्चितं भवति । द्वयोः जनयोः मध्ये जायमानं सम्भाषणं रहस्ययुक्तं इति ज्ञायते चेत् तत्र औत्सुक्यं जायते । फलतः अवधानं तत्र गच्छति । कथमपि तत् श्रोतुं यत्नः प्रवर्तते । अतः रहस्यं अवधानस्य कारणं भवति ।

**आभ्यन्तराणि कारणानि**

अवधानस्य कानिचन आन्तरिकाणि कारणानि वर्तन्ते । तानि तु १. रुचिः २. ज्ञानम् ३. लक्ष्यम् ४. स्वभावः (Habit) ५. औत्कण्ठ्यम् (Curiosity) ६. मनोवृत्तिः (Mood) ७. वंशानुक्रमः (Heredity) ८. आवश्यकता (Need) ६. पूर्वानुभवः (Previous Experience) १०. मूलप्रवृत्तिः (Instinct) चेति वर्तन्ते ।

**१. रुचिः**

कस्यापि वस्तुनः विषये अस्माकं रुचिर्भवति चेत् तत्र अस्माकम् अवधानं गच्छति । चलच्चित्रदर्शने यूनां रुचिर्भवतीति कारणात् तत्रस्थपद्यानि श्रमेण विना तेषां हृदिस्थानि भवन्ति । किन्तु पाठ्यक्रमे विद्यमानं पद्यं महता परिश्रमेणापि कण्ठस्थीकर्तुं ते क्लेशमनुभवन्ति । रुचौ सत्यां तु पाठ्यक्रमस्थविषयोऽपि हृदिस्थो भवति । अतः रुचिः अवधानस्य एकं आभ्यन्तरकारणं भवति ।

**२. ज्ञानम्**

यस्मिन् विषये पुरुषस्य(व्यक्तेः) ज्ञानं भवति तस्मिन् विषये तस्य अवधानं निर्बाधं गच्छति । यथा विज्ञानसम्बद्धविषये वैज्ञानिकस्य अवधानं भवति । वैज्ञानिकः विज्ञानं जानाति इति कारणात् तत्सम्बद्धविषये तस्य अवधानं गच्छति । तत्र कस्यचित् कृषकस्य अवधानं न भवति, यतो हि सामान्यतः कृषकः विज्ञानसम्बद्धविषये ज्ञानवान् न भवति । इत्थमेव कृषिकर्मणि यथा कृषकस्य अवधानं भवति तथा वैज्ञानिकस्य इतरेषां वा अवधानं न भवति । आभूषणानां वस्त्रविन्यासानां अङ्गरागानां वा विषये स्त्रीणां यथा अवधानं भवति न तथा पुरुषाणां भवति । अत्र तत्तद्विषये तत्तत्पुरुषस्य ज्ञानं अधिकावधानस्य कारणं भवति ।

**३. लक्ष्यम्**

यस्य कर्मणः लक्ष्यं पुरुषः जानाति तदुपरि तस्य अवधानम् अधिकं भवति । अर्थात् मनुष्यः किमपि कार्यं किन्निमित्तं करणीयमिति पूर्वमेव जानाति चेत् तस्मिन् कार्ये तस्य अवधानं दृढं भवति ।

**४. अर्जितस्वभावः**

यस्य Postal Stamp सङ्ग्रहणं प्रवृत्तिः भवति पुरतः विद्यमानेषु बहुषु वस्तुषु सर्वादौ Postal Stamp एव अभिज्ञातुं प्रभवति । एवमेव यः प्रतिदिनं निश्चितसमये चायं/–,–,–, पिबति सः निश्चयेन तस्मिन् समये चायमेव/–,–,–, चिन्तयति । इत्युक्ते तस्य स्वभावः तस्मिन् विषये रूढः अस्ति इति कारणात् तस्य अवधानं चायविषये/–,–,–, केन्द्रीकृतं भवति । इत्थं मनुष्यस्य अर्जितस्वभावकारणात् (Habit) तस्य अवधानं तत्सम्बद्धविषये भवति ।

**५. औत्कण्ठ्यम्**

औत्कण्ठ्यम् अवधानस्य कारणं भवति । किमपि द्रष्टुं, श्रोतुम्, अवाप्तुं वा विद्यमाना प्रवृत्तिरहिता इच्छा एव औत्कण्ठ्यं वर्तते । अन्याः इच्छाः प्रवृत्तिं कदाचित् जनयेयुः कदाचित् न जनयेयुर्वा । औत्कण्ठ्यं तु प्रवृत्तिहीना फलापेक्षिणी इच्छा भवति । एतादृशम् औत्कण्ठ्यं भिन्नभिन्नविषयेषु सर्वेषामपि जनानां भवत्येव । यथा पङ्कज उदासवर्यस्य गजलकार्यक्रमः क्वचित् आयोजितश्चेत् तत्र औत्कण्ठ्ययुक्तः स्तब्धो भूत्वा तत्कार्यक्रमं श्रुणोति, कार्यान्तरं न कुरुते च । तत्र पङ्कज उदासस्य गजलकार्यक्रमे विद्यमानम् औत्कण्ठ्यं तस्य श्रवणक्रियायाम् अवधानं जनयति ।

**६. मनोवृत्तिः**

कार्यसाधनानुकूलमनोवृत्तिः Mood इत्युच्यते । एतस्य सत्वे कार्यसाधनार्थं अवधानपुरःसरं प्रवृत्तिर्जायते ।

**७. वंशानुक्रमः**
आनुवंशिकतायाः कारणात् पुरुषस्य अवधानं तत्तद्विशिष्टे विषये भवति । यथा कस्यचित् सैनिकस्य पाकिस्थानस्य दौष्ट्यविषये अवधानम् । कस्यचित् धीवरसुतस्य मीनानाम् आहरणविषये अवधानम्।

**८. आवश्यकता**
मनुष्यस्य आवश्यकताः विभिन्नाः भवन्ति । तासां पूर्तिः यैः वस्तुभिः भवति तेषां वस्तूनां विषये अवधानं मनुष्यस्य भवति । यथा - गृहे दूरदर्शनस्य आवश्यकता अस्ति चेत् यत्र कुत्रापि तद्विषयकविज्ञापिका (Advertisement) झटिति मनुष्यस्य अवधानं आकर्षति ।

**९. पूर्वानुभवः**
कस्मिन्नपि कर्मणि पुरुषस्य पूर्वानुभवः अस्ति चेत् पुनः तादृशकर्मकरणे तस्य सम्यगवधानं भवति । अत एव पूर्वानुभवाधारेण कार्यवितरणं सर्वेषु क्षेत्रेषु क्रियते । यथा विद्यालयेषु सभासञ्चालनम्, पत्रिकासम्पादनम्, परियोजनाकार्यनिर्वहणम् इत्यादि।

**१०. मूलप्रवृत्तयः**
अवधानकेन्द्रीकरणे मानवस्य मूलप्रवृत्तयोऽपि कारणानि भवन्ति । अत एव विज्ञापिकासु (Advertisement) जनानाम् अवधानम् आक्रष्टुं युवतीनां चित्राणि मुद्रापयन्ति। इत्थम् अवधानस्य केन्द्रीकरणे बाह्याभ्यन्तरकारणानि बहूनि वर्तन्ते। शिक्षणाधिगमप्रक्रियायां एतादृशानि अवधानकारणानि विज्ञाय तदनुकूलतया कक्ष्यानिर्वहणेन अपेक्षितलक्ष्यसिद्धिर्भवति।

**अवधानकेन्द्रीकरणस्य उपायाः**
अवधानस्य बाह्याभ्यन्तराणि कारणानि विज्ञाय तत् केन्द्रीकर्तुम् अपेक्षिताः उपायाः चिन्तनीयाः। कक्ष्याशिक्षणे छात्रावधानं केन्द्रीकर्तुम् एते उपायाः नितरां सहकुर्वन्ति । ते तु इत्थं वर्तन्ते १.पूर्वसिद्धता २.शान्तवातावरणम् ३.विषयपरिवर्तनम् ४.विभिन्नविधीनाम् उपयोगः ५.दृश्यश्रव्योपकरणानाम् उपयोगः ६.छात्ररुचेः प्राधान्यम् इत्यादि।

**१. पूर्वसिद्धता**
कक्ष्यायाम् पूर्वसन्नाहेन विना साक्षात् गत्वा अध्यापने क्रियमाणे छात्राणां कदाचित् अवगमनं न भवति चेत् अध्यापकः तदवगमयितुं पुनः पुनः विषयमावर्तयति । अयं प्रयत्नः साफल्यं जनयति वा न वा। किन्तु समयं तु अवश्यं नाशयति । तेन सहैव छात्राणां अवधानं विमुखीकरोति । तदर्थं सम्यग्रूपेण छात्रावगमयोग्यरीत्या पाठयितुं पूर्वसन्नाहः कर्तव्यो भवति।

**२. शान्तवातावरणम्**
कक्ष्यायाम् अध्यापनावसरे अवरोधः कोऽपि न स्यात्। एतादृशावरोधकारणात् कक्ष्यायाः शान्तता नश्यति । प्राधान्येन अयमवरोधः बाह्यावरोधः आन्तरिकावरोधश्चेति द्विविधः। बाह्यावरोधं यानयन्त्रादीनां कर्कशध्वनिरूपं शिक्षकः नियन्त्रयितुं तु न शक्नोति । तथापि तादृशावरोधेभ्यः छात्राणाम् अवधानं विमुखीकृत्य स्वीयपाठने आक्रष्टुम् अर्हति। आन्तरिकावरोधस्तु आधिक्येन छात्राणां अनुशासनहीनता एव भवति । अतः कक्ष्यायां शान्ततायाः संरक्षणार्थं आन्तरिकावरोधस्य निरनुशासनस्य (अनुशासनहीनतायाः) अपनोदनार्थं यत्नः कर्तव्यः। येन छात्राणाम् अवधानम् अध्याप्यविषये स्थिरीभवति।

**३. विषयपरिवर्तनम्**
माणवकानां स्वभावतः एकस्मिन् विषये चिरकालपर्यन्तम् अवधानं न तिष्ठति । अत एव गीतायामपि उक्तं "चञ्चलं हि मनः कृष्ण" इति । अतः अध्यापकः एकमेव विषयं चिरकालपर्यन्तं न बोधयेत् । एकस्मात् कालांशात् अधिकं समयं स्वीकर्तुं अध्यापकः अभिलषति चेत् अवश्यं विषयं परिवर्तयेत् । इत्थम् आचर्यते चेत् छात्राणाम् अवधानं अध्याप्यविषयात् न विमुखीभवति ।

**४.विभिन्नविधीनाम् उपयोगः**
एकस्य एव विधेरुपयोगः छात्राणाम् अवधानं नाशयति । विशिष्य माध्यमिकस्तरे छात्राः अधिकं निष्क्रियं व्याख्यानं श्रोतुं नेच्छन्ति । अतः क्रीडाविधिं, क्रियाकलापविधिं, प्रयोगविधिं, निरीक्षणविधिं वा अध्यापकः उपयुञ्जीत, येन छात्राणाम् अवधानं अध्येयविषये केन्द्रीकृतं भवेत् । क्रीडादिषु छात्राणां इच्छा स्वाभाविकी । निष्क्रियश्रोतृत्वेन बालाः कक्ष्यायाम् उपवेष्टुं नाभिलषन्ति । अतः क्रीडामाध्यमेन, कार्यकरणमाध्यमेन, प्रयोगमाध्यमेन वा छात्राणां बोधनम् अध्यापकः कुर्यात् ।

**५. सहायकसामग्रीणाम् उपयोगः**
श्यामपट्टस्य, चित्राणां, प्रतिकृतीनाम्. मानचित्राणां,साक्षाद्वस्तूनां वा दर्शनपुरस्सरम् अध्यापकः पाठयति चेत् छात्राणामवधानं स्थिरं भवितुमर्हति । बोधोऽपि सुलभः सुदृढश्च भवति । दृश्यश्रव्योपकरणानि छात्राणाम् अवधानस्य संरक्षणे संवर्धने च अत्यन्तम् उपकुर्वन्ति । अतः कक्ष्यायां यावच्छक्ति अधिकोपयोगः एतेषां भवेत् ।

**६. छात्ररुचेः प्राधान्यम्**
अध्याप्यविषये बालकानां रुचिः भवेत् । अन्यथा अध्यापनं व्यर्थं भवति। छात्राः यस्मिन् विषये रुचिमन्तो भवन्ति स एव विषयः बोधनीयः इति तु न एतस्य तात्पर्यम्। छात्राणां रुचिं उत्पाद्य अनन्तरं बोधनीयमिति तात्पर्यम्। विषयेऽस्मिन् डम्–विल् वर्यः इत्थं प्रतिपादयति यत् "पाठस्य प्रारम्भः तावत् बालकानां स्वाभाविकरुच्यनुगुणं भवतु नाम। किन्तु पश्चात् मन्दं मन्दं अन्यविधीनाम् माध्यमेन अध्यापकाः तेषु रुचिमुत्पादयन्तु" इति ।

**उपसंहारः**
इत्थम् अवधानस्य स्वरूपं बाह्याभ्यन्तरकारणानि च विज्ञाय अवधानकेन्द्रीकरणस्य उपायान् शिक्षकः जानाति चेत् शिक्षणोद्देश्यानां पूर्तिं सम्पाद्य सफलशिक्षकः भवितुमर्हति, छात्राश्च लाभान्विताः सन्तः समुचितोत्कर्षं प्राप्नुवन्ति इति निश्चप्रचम् वक्तुम् अर्हामः ।

**सन्दर्भ**

1. गुप्ता एस. पि. उच्चतर शिक्षामनोविज्ञान, शारदा पुस्तक भवन, इलहाबाद (२००३),
2. पाठक. पि. डि. शिक्षामनोविज्ञान, विनोद पुस्तक मन्दिर, आग्रा (१९९८)
3. Aruna Mohan G. Understanding the Learner and Classroom Management, Neelkamal Publications Hyderabad, 2010.
4. Jayaswal Seetaram. Foundations of Educational Psychology, Vinod Pustak Mandir Agra.
5. Sinha Jadunath, Manual of Psychology.
6. Mangal- S-K- Advanced Educational Psychology, PHI Learning Private Limited, New Delhi. २०१२.
7. सिंह अरुण कुमार संज्ञानात्मक मनोविज्ञान, मोतीलाल बनारसीदास, २००६.
8. वेङ्कटराघवाचार्यः वि एस्, शिक्षामनोविज्ञानम्, राष्ट्रियसंस्कृतविद्यापीठम् तिरुपतिः १९९२.